Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १५ अङ्क : १६९
जुन - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### कोरोना v/s कर्तव्यनिष्ठा

जीवनस्य तीक्ष्णां वास्तविकतां लङ्घयित्वा मनुष्यः क्षणमपि जीवितुं न शक्नुयात् । आपत्तिः अपि मनुष्यजीवनस्य कश्चित् अप्रियः भागः वर्तते। कश्चित् सुभाषितकारः एतत् सर्वं सहजतया स्वीकर्तुं लघु सङ्केतं ददाति। तस्य शैली निश्चयेन भिन्ना अस्ति–

**कस्य दोषः कुले नास्ति व्याधिना को न पीडितः ।**
**व्यसनं केन न प्राप्तं कस्य सौख्यं निरन्तरम् ॥**

अर्थात् जीवने कुलदोषः, व्याधिः, सङ्कटं, सामान्यानि दुःखानि च यथाकालम् आपतन्ति। तत्र कुतः शोकः? तत्र तु प्रतिकारः एव उत्तरम् । प्रकृत्याः अनेन क्रमेण पूर्वमपि बहवः रोगाः प्रविष्टाः निवृत्ताश्च । 'कोरोना' अपि तेषु एकतमः । तदानीं तु आधुनिकानि उपकरणानि स्वल्पानि आसन्, सम्प्रति अधिकानि वर्तन्ते । तदानीं शैक्षणिकः विकासः मन्दः आसीत्, सम्प्रति वेगवान् वर्तते । परन्तु तं विषयं परिहरामः । चिन्तक्षेत्रे तु सङ्कटेऽस्मिन् किं कर्तव्यम् इत्येव ननु ? अस्मिन् काले चित्रद्वयं दृश्यते। एतत् द्विविधं चित्रं समग्रस्य राष्ट्रस्य स्वभावं द्योतयति। केचन सज्जनाः नानावचनैः अज्ञान् जनान् पण्डिताः इव प्रबोधयन्ति । हस्तप्रक्षालनं कथं कर्तव्यम् इति विश्वप्रसिद्धाः नायकाः मां बोधितवन्तः ! एतदपि सेवाकर्म एव । परन्तु तादृशानां सज्जनानाम् अन्यत् किमपि कर्तव्यं नास्ति किम् ? प्रजानां वञ्चनया प्रभूतं धनं, यशोवर्धनानि सुवर्णचन्द्रकानि च कोशे तूर्ष्णीं निक्षिप्य राष्ट्रभक्तेः एतादृशं प्रदर्शनं कुर्वन्तः एते किं प्रतिपादयितुम् इच्छन्ति ? अन्यदपि चित्रं दृश्यते लोके। मम श्यालीपतिः । तस्य नाम नीलेशः । गृहम् आगतः सः मया पृष्टः – 'किं क्रियते सम्प्रति ?' तेन यत् उक्तं तत् कार्यं 'अहं शिक्षकः – प्राध्यापकः' इति मिथ्याभिमानस्य 'कोरोना' पीडितान् निश्चयेन लज्जयितुं शक्नोति । सः महाशयः दशभिः मित्रैः सह स्वयं स्वादु भोजनं पक्त्वा प्रतिदिनं ५०० अकिञ्चनान् बुभुक्षितान् सगौरवं भोजयति। न कोऽपि आटोपः न च मिडिया-संस्कारः। सोऽपि मम कुशलं ज्ञात्वा मां पृष्टवान्। अहं सलज्जं निवेदितवान् – 'नाटकस्य लेखनेन सामाजिकं प्रति संस्कारं चिन्तयन् अस्मि।' आत्मानं शिक्षितं मन्यमानः मनुष्यः शिक्षणात् कियत् दूरे अस्ति इति राष्ट्रसङ्कटेषु किञ्चित् ज्ञायते। केनचित् चिन्तकेन सुन्दरं प्रोक्तम्– भवतः कथने कोऽपि विश्वासं न करिष्यति अतः किमपि कृत्वा दर्शयतु । 'कोरोना' श्वः शान्तिं गमिष्यति, परन्तु मूकसेवकानां कर्तव्यनिष्ठा चिरं पूज्यतां प्राप्स्यति।

# न त्यक्तव्यम्

व्योम शाहः

ब्रुक्लीन-नगरे निर्धने परिवारे पित्रोः एकः बालः जातः। सः अतीव पटुः आसीत्। शनैः शनैः वर्धमानस्य तस्य पिता एकवारम् अचिन्तयत् - "कथमपि अहम् एतम् प्रगतिशीलं भावयितुमिच्छामि। अहं जानामि यद् केवलं पठनेन तादृशं भवितुं न शक्यते। अतः किञ्चित् नविनम् एव कर्तव्यं स्यात्।"

एकस्मिन् दिवसे तातः तं त्रयोदशवर्षीयं पुत्रम् आहूय उक्तवान् - "हे बाल! पश्यतु। अस्य युतकस्य मूल्यं कियद्?" "एक-डोल्लर" इति अवदत् बालः। "तर्हि अहमिच्छामि यद् भवान् एतत् द्वि-डोल्लर-मूल्येभ्यः विक्रीणीताम्।"इति अकथयत् पिता। पितुः वचनं श्रुत्वा - "भविष्यति वा न तद् न जानामि किन्तु प्रयत्नं करोमि।" एवम् उक्त्वा सः गतः।

सः युतकं प्रक्षाल्य समीकरणम् अकरोत्। अपरे दिने सः विद्यूतरथविरामस्थानकं प्राप्तवान्। तत्र बहु-जनसम्मर्दः आसीत्। षड्-घण्टा-पर्यन्तं प्रयत्नं कृत्वा सः तद् युतकं द्वि-डोल्लरेभ्यः विक्रीतवान्। अतीव हृष्टः सः गृहम् आगच्छत्। तस्य पिता अपि सन्तुष्टः। अधुना एवंविधं प्रतिदिनम् अभवत्। तस्य पिता युतकं ददाति स्म सः विक्रीणीते स्म।

एकदा तस्य पिता उक्तवान् - "भवान् एतत् विंशति-डोल्लरेभ्यः विक्रिणीतुं शक्नोति?" "नैव शक्यम्। एतस्मै अधिकाधिकं डोल्लरद्वयं प्राप्यते।" "प्रयत्नं कर्तव्यमेव। स्वीकरोतु।" तत् स्वीकृत्य सः स्थापितवान्। तदानीम् अमेरिका-मध्ये डोनाल्ड-डकः मिकि-मौसः च बहुप्रसिद्धौ आस्ताम्। तस्य भ्रातुः सहाय्यं स्वीकृत्य सः तस्मिन् युतके एकं डोनाल्डडकं मिकिमौसं च व्यरचयत्।

एवंविधां सज्जतां कृत्वा सः तां प्राथमिकशालाम् अगच्छत् यत्र धनिकानां पुत्राः पठन्ति स्म। तत्र एकः सेवकः तस्य भर्तारं नेतुं समागतः। भर्ता दशवर्षीयः बालः आसीत् यस्मै वस्त्राणि रोचते स्म। बालः तद् युतकं स्वीकृत्य तस्मै विंशतिडोल्लर अपरं पञ्चडोल्लर च पारितोषिकस्वरूपेण दत्तवान्। सः बहुहृष्टः यतः तस्य पितुः तावद् मासपरिमितं वेतनम् आसीत्।

यदा सः गृहं प्राप्तवान् तदा तस्य पिता तस्मै अपरम् उपयुक्त-युतकं प्रदाय उक्तवान् - "भवान् एतत् युतकं द्विशत-डोल्लरेभ्यः विक्रीणीताम् ।" सः विस्मितः किन्तु संशयं विहाय सः तत् स्व्यकरोत्। मासद्वयानन्तरं फारा-फोसेट-अभिनेत्री तस्याः चलचित्रस्य संवर्धनायै (promotion) ब्रुक्लीन-मध्ये आगता। सः बालः युतकं स्वीकृत्य तत्र प्राप्तवान्। जनानां सम्मर्दाद् मार्गं कृत्वा सः बालः तस्याः पार्श्वे अगच्छत् उदितवान् च - "कृपया अस्य उपरि भवत्याः हस्ताक्षरं करोतु।" बालस्य स्मितं मुखं दृष्ट्वा सा तथा कृतवती।

अतीव हृष्टः सः उच्चैः अवदत् - "एतत् युतकं फारा-फोसेट-अभिनेत्र्या हस्ताक्षरीकृतम्। द्विशत-डोल्लर! कः क्रेष्यति?" एवंविधं सः सघोष-विक्रयणम् आरब्धवान्। तत्र उपस्थितः कश्चन धनिकः तत् क्रीतवान्।

यदा सः गृहं प्राप्य पितरं सर्वमुक्तवान् तदा पितुः नेत्रयोः अश्रूणि निःसृतानि- "पुत्र! अहं भवते अतीव मुदितः। भवान् अनन्यः बालकः।" रात्रौ सः पितुः सकाशं सुप्तवान्। तदानीं पिता पृष्टवान् - "सुत! एतेषां विक्रयणं कृत्वा त्वं सफलतायाः विषये किम् अवगतवान्?"

सः तदा उक्तवान्-

**यत्र वाञ्छा पथस्तत्र प्रयत्नश्चाप्यपेक्षितः ।**
**सिद्धिः यत्र प्रयत्नो विजानीयादयं सदा ॥**

यत्र इच्छा अस्ति तत्र मार्गः वर्तते एव। किन्तु तस्यां दिशि प्रयत्नः अपेक्षितः। सन्मार्गे यदि वयं प्रयत्नं कुर्मः तर्हि निश्चयेन सिद्धिः प्राप्यते।

"सम्यक्। अपरमपि कथयितुं शक्नुमः। एक-डोल्लर-मूल्यस्य युतकस्य मूल्यं यदि वयं वर्धितुं शक्नुमः तर्हि जीवितानां मनुष्याणां कथं न?" इति पिता तम् असूचयत्।

'पराजयात् न भेतव्यम्' इति गुणः अनेन बालकेन स्वभावे अलङ्कृतः। एतस्य बालकस्य नाम अस्ति मैकलजोर्डनः। सः विश्वविख्यातः बास्केटबोलक्रीडकः। जीवने सः नैकवारं पराभूतः किन्तु सः कदापि प्रयत्नं न अत्यजत्। अतः एव उच्यते न त्यक्तव्यम्।

## असफलता

कदाचित् चन्द्रग्रामजनाः वृक्षस्य अधः वितर्दौ उपविश्य जल्पन्तः आसन्। तदा तेन मार्गेण क्षुवं कुर्वन् गच्छन् बालकृष्णः नाम बालः तैः दृष्टः। तदा तत्रत्येषु अन्यतमः महेशः परिहाराय तं बालम् असूचयत् – "मम अपि एषा एव स्थितिः आसीत्। मम पत्नी पीनसनिवारणाय काश्चन गुलिकाः दत्तवती। ततः अहं स्वस्थः अभवम्। अतः भवान् मम पत्न्याः निकटं गत्वा गुलिकाः प्राप्य गच्छतु" इति।

"अस्तु, तथैव करोमि" इति उक्त्वा सः बालकः ततः निर्गतवान्।

"बालकृष्णः कस्यापि वचनं न पालयति। तादृशः अपि यथा अङ्गीकुर्यात् तथा अकरोत् भवान्। अहो, भवदीयं सामर्थ्यम्।" इति तम् अश्लाघत कश्चन वृद्धः।

"अहं ज्येष्ठान् अपि वचनेन अङ्गीकारयामि लीलया। तादृशी विशिष्टा प्रतिभा अस्ति मम" इति सगर्वम् उक्तवान् महेशः।

तदा पार्श्वे उपविष्टेन रमेशेन कथितम् – "अन्येषां विषये किं चर्चया? अन्यस्य वचनमात्रे मम न विश्वासः। मम पृष्ठतः वटः खलु अस्ति? तं निम्बवृक्षत्वेन अङ्गीकारयितुं किं भवान् शक्नुयात्?" इति।

रमेशस्य पृष्ठभागे वस्तुतः निम्बकः एव आसीत्। अतः क्रुद्धः महेशः – "भवतः पृष्ठतः निम्बकः एव अस्ति। तं किमर्थं वटं वदति भवान्?" इति वदन् कानिचन पर्णानि अवचित्य तस्मै अदर्शयत्।

महेशेन आनीतानि पर्णानि अवलोक्य रमेशेन उक्तम् – "एतानि पर्णानि निम्बवृक्षस्य एव इति तु अङ्गीक्रियते मया। किन्तु यस्य वृक्षस्य विषये चर्च्यते तस्मात् एव अवचित्य एतानि आनीतानि इत्यत्र कथं भवेत् मम विश्वासः?" इति।

"उपस्थिताः जनाः एव अत्र प्रमाणम्" इति अवदत् महेशः। तदा रमेशः अवदत् – "द्रष्टुं समर्थयोः मम नेत्रयोः सत्योः का आवश्यकता अन्येषां वचनमात्रे विश्वासस्य?" इति।

"अस्तु, सकृत् भवान् पृष्ठतः परिवृत्य पश्यतु। भवतः नेत्रे निर्दोषे चेत् सः निम्बकः एव, न तु वटः इति भवान् अवगच्छेत् एव" इति अवदत् महेशः। "परिवृत्य पृष्ठतः दर्शनस्य इच्छा मम नास्ति। अपेक्ष्यते चेत् भवान् एव तं वृक्षं मम पुरतः आनीय स्थापयतु। अन्यथा मम अङ्गीकारणे स्वस्य असफलताम् अङ्गीकरोतु" इति।

रमेशस्य एतानि वचनानि श्रुत्वा सर्वे अहसन्। महेशः रमेशस्य पुरतः पराजितः अभवत्।

## व्याकरणोपयोगिता का ?

विश्वः जयेशभाई वोरा

लिखितमस्ति यद् भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा। भारतस्य संस्कृति प्राचीनतमा च प्रख्याता चास्ति। संस्कृतं तु आधारोऽस्ति। संस्कृतज्ञानं व्याकरणेन विना अशक्यम्। अतः व्याकरणपठनमत्यावश्यकम्।

प्रथमस्तु मनसि शङ्का उत्पद्यते यद् "व्याकरणम्" इति शब्दस्य कोऽर्थः ? तर्हि शास्त्रकारेणोच्यते यद्। व्याक्रियन्ते व्युत्पाद्यन्ते लौकिक सामयिकाः शब्दाः अनेन, अथवा व्याक्रियन्ते व्युत्पाद्यन्ते पृथक्क्रियते असाधुशब्देभ्यः साधुशब्दाः अनेन इति व्याकरणम्। वि+आङ् उपसर्गपूर्वक- "डुकृंग् करणे" धातोः 'करणाधारे' इति सूत्रमाध्यमेन, अनट्प्रत्यये कृते च णत्वे प्रथमाविभक्त्या एकवचनस्य प्रत्यये विहिते सति 'व्याकरणम्' इति शब्दो निष्पद्यते। शास्त्रेऽपि निगदितं यद् -

**व्याकरणात् पदसिद्धः, पदसिद्धेरर्थनिर्णयो भवति।**
**अर्थात् तत्त्वज्ञानं, तत्त्वज्ञानात् परं श्रेयः ॥**

अर्थात् - व्याकरणशास्त्रमाध्यमेन मोक्षप्राप्तिर्जायते। अत्रैका शङ्कोत्पद्यते यद् व्याकरणमेव मोक्षं प्रापयति ? आम्, यत् सम्यग् शास्त्रागमादीनामध्ययनं व्याकरणेन विना न सम्भवति। शास्त्रागमैः मोक्षं गन्तुं शक्नुमः, अस्मिन् विषये वेदैकम् वाक्यमस्ति यद् - "ऋते ज्ञानान्न मुक्तिः" अर्थात् - ज्ञानेन विना जनाः मुक्तिं नैव प्राप्तुं शक्नुवन्ति। आवश्यकनिर्युक्तावप्येका प्राकृतगाथा विद्यते यत् -

**जं नेरईओ कम्मं, खवेइ बहुयाहि वासकोडिहिं।**
**तं नाणी तिहिगुत्तो खवेइ उसासमित्तेणं ॥**

अर्थात् - यानि कर्माणि नारकजीवः कोटिवर्षेषु दूरीकरोति, तानि ज्ञानी मन-वचन-कायाभिः श्वासोच्छ्वासमात्रेण क्षपयति। अतो व्याकरणं मुक्तेः साक्षात् साधनमस्ति।

**वेदस्य षट्स्वङ्गेषु - मुखं व्याकरणं स्मृतम्।**

अर्थात् - यथा जनोऽन्येष्वङ्गेषु छिन्नेषु जीवति। किन्तु मुखं विना जीवितुं न शक्नोति। तद्वदेतद् अपि वेदस्य मुखमस्ति। मुखेनैव सर्वं सम्पद्यते। महाभाष्येऽपि पतञ्जलिना निगदितं यत-

**एकशब्दस्सम्यग् ज्ञातस्सम्यग् प्रयुक्तः कामधुग् भवति, स्वर्गे लोके च पितरौ महीयेते ॥**

अर्थात् - एकशब्दस्य सम्यगुच्चारिते सम्यग् ज्ञाते सतीहलोके च परलोके पितरौ पूज्येते च इच्छितवरप्रापकश्च भवति, तर्हि सम्पूर्णे व्याकरणेऽधीते किं किं न साध्यते ? अस्मिन् विषये शास्त्रेऽपि कथितमस्ति यत्- यद्यपि बहु नाधीषे, तथाऽपि पठ पुत्र ! अस्मिन् विषये शास्त्रेऽपि कथितमस्ति यत्-

**यद्यपि बहु नाधीषे, तथाऽपि पठ पुत्र ! व्याकरणम्।**
**स्वजनः श्वजनो मा भूत, सकलं शकलं सकृच्छकृत् ॥**

अर्थात् - पिता पुत्रं कथयति, हे पुत्र ! न्यायशास्त्रं, मीमांसा, षड्दर्शनं न पठिस्यसि, तथापि व्याकरणं पठ। प्रयोजनम् - दन्त्यसकारस्य स्थाने तालव्यशकारे प्रयुक्ते सति स्वस्य सम्बन्धिनः जनाः कुक्कराणां सङ्घः जायन्ते, सकलं - अर्थात् सम्पूर्णं, शकलं पाषाणखण्डं स्यात्, सकृतेकवारं, तस्मिन् स्थाने शकृदित्युच्चारिते विष्ठा स्यात्। एतादृशा दोषा न स्युः, अतो व्याकरणं सम्यगधीतव्यम्।

## मासवार्ता

### सफला: Online संस्कृत-अभ्यासक्रमा:




कोरोनाविषाणो: प्रभावेन समग्रविश्वे सर्वाणि कार्याणि स्थगितानि सन्ति । भारतेऽपि एतस्य महान् प्रभाव: दृश्यते । शैक्षणिकसंस्थानानि अपि 'लॉकडाउन' कारणात् स्थगितानि सन्ति । एतादृशे कष्टकाले छात्राणाम् अध्ययनम् अवरुद्धं न भवेत् इति विचिन्त्य एकलव्य-संस्कृत-एकेडेमी-संस्थानेन संस्कृतस्य Online वर्गा: आरब्धा: सन्ति । विविधेषु अभ्यासक्रमेषु तद्यथा संस्कृतभाषाशिक्षणं प्रथम: स्तर:, संस्कृतभाषाशिक्षणं द्वितीय: स्तर:, Diploma in Sanskrit Teaching, बालसंस्कृतवर्गा:, पाणिनीयसूत्रपाठ:, वेदपाठ: इत्येतेषु अभ्यासक्रमेषु १८३ छात्रा: संस्कृतस्य अध्ययनम् अकुर्वन् । संस्थानस्य अनेन आयोजनेन सर्वे छात्रा: अभिभावकाश्च प्रसन्ना: सन्तुष्टा: च सन्ति ।

### कोरोनारक्षाकवचम्

त्वं करुणावतारोऽसि कोरोनाख्यविषाणुधृक् ।
रुद्ररूपश्च संहर्ता भक्तानामभयङ्कर: ॥१॥

मृत्युञ्जय महादेव कोरोनाख्याद्विषाणुत: ।
मृत्योरपि महामृत्यो पाहि मां शरणागतम् ॥२॥

मांसाहारात्समुत्पन्नाज्जगत्संहारकारकात् ।
करुणाख्याद्विषाणोमां रक्ष रक्ष महेश्वर ॥३॥

चीनदेशे जनिं लब्ध्वा भूमौ विष्वक्प्रसर्पत:
जनातङ्काद्विषोणोर्मां सर्वत: पाहि शङ्कर ॥४॥

बालकृष्ण: स्मरंस्त्वां वै कालकूटं न्यपादहो ।
न ममारार्भक: शम्भो ततस्त्वां शरणं गत: ॥५॥

समुद्रमथनोद्भूतात् कालकूटाच्च विभ्यत:
त्वयैय रक्षिता देवा देवदेव जगत्पते ॥६॥

परक्षेत्रे चिकित्स्योऽच महामारो भयङ्कर: ।
भीषयति जनान्सर्वान् भव त्राता महेश्वर ॥७॥

वैद्या वैज्ञानिका विश्वे परास्ताश्च चिकित्सका: ।
आतङ्किता निरीक्षन्ते त्रातारं त्वामुमेश्वर ॥८॥

रक्ष रक्ष महादेव त्रायस्व जगदीश्वर ।
पाहि पाहि प्रपन्नं मां कोरोनाख्याद् विषाणुत: ॥९॥

नान्यं त्वदभयं जाने भीतानां भीतिनाशकृत् ।
अतस्त्वां शरणं यातं भीतं पाहि महेश्वर ॥१०॥

महायोगिन् महादेव कोरोनाख्यं विषाणुकम् ।
संविनाश्य जनान् रक्ष तव भक्तान् विशेषत: ॥११॥

मांसाहारान् सुरापानान् कामं संहरतादयम् ।
कोरोनाख्यो विषाणुस्तु मा हिंस्याच्छिवसेवकान् ॥१२॥

भिक्षुयोगेश्वरानन्दकृतं द्वादशपद्यकम् ।
जन: पठन् रक्षणीय: त्वयैव परमेश्वर ॥१३॥

✍ **भिक्षुयोगेश्वरानन्द:**

## कृपया हसन्तु

**पिता - (पुत्रम् उद्दिश्य) भो: ! गणितविषये कति अङ्का: प्राप्ता: त्वया ?**

**पुत्र: - भो: पित: ! भ्रातु: अपेक्षया मया दशाङ्का: एव न्यूना: प्राप्ता: सन्ति ।**

**पिता - तव भ्रात्रा कति अङ्का: प्राप्ता: ?**

**पुत्र: - तेन दशाङ्का: प्राप्ता: सन्ति ।**

★ ★ ★ ★ ★

**नमन:- (सङ्गीतकार्यक्रमे रमणं प्रति) भो: रमण ! गानसमये गायका: स्वनेत्राणि किमर्थं निमिलयन्ति ?**

**रमण:- गायका: मृदुस्वभावा: भवन्ति, ते जनानां दु:खं द्रष्टुं न शक्नुवन्ति अत: नेत्राणि निमिल्य गायन्ति ।**

★ ★ ★ ★ ★

**रमण: - (नमनम् उद्दिश्य) एतस्मिन् जगति अहमेव मूर्ख: अस्मि इति अहं चिन्तयन् आसम् ।**

**नमन: - किं जातम् ?**

**रमण: - गतसप्ताहे अहं मम पत्न्यै काश्मीरीसेवफलानि आनेतुम् उक्तवान् आसम् ।**

**नमन: - तर्हि किम् अभवत् ?**

**रमण: - अद्य सा काश्मीरात् दूरभाषम् अकरोत् यत् मया सेवफलानि स्वीकृतानि सन्ति ।**

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**कुम्भकारगृहेऽप्यर्धं तदर्धं हस्तिनापुरे ।**
**तस्य युग्मं च लङ्कायां यो जानाति स: पण्डित: ॥**

कुम्भकारस्य गृहे अर्धभाग: हस्तिनापुरे अर्धभाग:, तयो: युग्म लङ्कायां विद्यते । किमिति य: जानाति स: पण्डित: ।

**उत्तरम्** – कुम्भकर्ण:

**कृष्णमुखी न मार्जारी द्विजिह्वा न च सर्पिणी ।**
**पञ्चभर्त्री न पाञ्चाली यो जानति स: पण्डित: ॥**

एषा अस्ति कृष्णमुखी, किन्तु मार्जारी न । अस्या: जिह्वाद्वयं वर्तते, किन्तु सर्पिणी न । अस्या: पञ्च पतय:, किन्तु पाञ्चाली न । य: उत्तरं जानीयात् स: पण्डित: ।

**उत्तरम्** – लेखनी

**गोपालो नैव गोपालस्त्रिशूली नैव शङ्कर: ।**
**अपि चक्री स नो विष्णुर्यो जानाति स: पण्डित: ॥**

**उत्तरम्** – वृषभ:

**चक्रैकं न रथी सूर्य: भूमौ तिष्ठति सारथि: ।**
**अगस्त्यताननिर्माण: यदि जानासि तद्वद ॥**

रथी अस्ति, एकं चक्रं, किन्तु सूर्य: न । सारथि: भूमौ तिष्ठति । अगस्त्य (कुम्भसम्भव: इति ख्यात:) तातनिर्माण: क: इति यदि जानाति तर्हि वद ।

**उत्तरम्** – कुम्भकार:

## ज्ञानसरिता

**ऊर्ध्वमूलः वृक्षः** – 'ऊर्ध्वमूलमधःशाखः' इति उपनिषत्सु कश्चन वृक्षः वर्ण्यते । किन्तु वस्तुतः अपि ऊर्ध्वमूलः इव दृश्यमानः कश्चन वृक्षः अस्ति इति किं भवन्तः जानन्ति ? एतस्य प्रकाण्डं तावत् विशालं भवति यत् तस्य अन्तः निर्मिते रिक्तावकाशे बहवः जनाः युगपत् एव स्थातुम् अर्हन्ति । एषः वृक्षः त्रिशताधिकवर्षेभ्यः पूर्वम् उत्पन्नः इति श्रूयते ।

एतस्य वृक्षस्य नाम बुवाबाबवृक्षः इति । आफ्रिकादेशे ओष्ट्रेलियादेशे च एतज्जातीयाः वृक्षाः प्राप्यन्ते । एतस्य वृक्षस्य प्रकाण्डं जलभाण्डाकारकम् (ड्रम्–आकारकम्) । विस्तारः नवमीटरात्मकः (३० पादमितः), औन्नत्यं च १८ मीटरात्मकं (६० पादमितम्) ।

एषः बुवाबाबवृक्षः विलक्षणतया दृश्यते । यदा एतस्मात् वृक्षात् पर्णानि पतितानि भवन्ति तदा शाखाः मूलानि इव दृश्यन्ते । अतः एषः वृक्ष 'ऊर्ध्वमूलः' इव भासते । वृक्षस्य प्रकाण्डं मसृणं कान्तियुक्तं च भवति । वृक्षस्य त्वक् श्वेतमिश्रितरक्ता । क्वचित् ताम्रवर्णीया अपि ।

**भवतां ध्वनिः** – स्वस्य ध्वनिः अनन्यसदृशः इति किं भवन्तः जानन्ति ? एकस्य ध्वनिः इव अन्यस्य न भवति । यमलयोः अपि ध्वनिः उत्पद्यते तदा शतशः स्नायवः क्षणात्मके काले युगपत् एव कार्यं कुर्वन्ति । ध्वनिपेटिका असंख्यान् ध्वनीन् उत्पादयितुं समर्था । एषा मृद्वस्थना निर्मिता भवति । एतस्य अन्तः पुटीकृतं तनु पटलयुगलं भवति । तयोः पटलयोः मध्ये वायुसञ्चाराय अवकाशः भवति ।

प्रौढानां पुरुषाणां ध्वनिः महिलानां ध्वनितः अपि गभीरं भवति । तत्र कारणं ध्वनिपेटिका । पुरुषाणां ध्वनिपेटिकायाः आवरणास्थि महिलायाः ध्वनिपेटिकायाः आवरणास्थितः अपि दृढं भवति ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सिक्थः** | भात | boild rice |
| **सिचयः** | वस्त्र | cloth |
| **सित** | सफ़ेद | white |
| **सिञ्जा** | आभूषणो की झंकार | tinkling sound of ornaments |
| **सिरा** | शरीर की रक्तवाहिनी | a vein |
| **सीमन्तः** | मांग | a parting line of ladies hair |
| **सीमा** | हद | a boundary |
| **सुकुमारः** | कोमल | tender |
| **सुगन्धिः** | मधुरगन्ध | sweet smell |
| **सुजनता** | भले पुरुषो का समूह | a group of good men |
| **सुतः** | पुत्र | a son |
| **सुतराम्** | अत्यधिक रूप में | exceedingly |
| **सुधा** | अमृत | nectar |
| **सुपर्ण** | अच्छे पंखो वाला | well winged |
| **सुपर्णः** | गरुड | an epithet of garuda |

## किं भवन्तः जानन्ति ?

**१ ) 'शृङ्गारलहरी'काव्यग्रन्थस्य रचयिता कः वर्तते ?**

(क) दण्डी (ख) जगन्नाथः (ग) बल्लालः (घ) भूषणः

**२ ) 'दूतघटोत्कचः''उरूभङ्गम्' इत्येतौ नाट्यग्रन्थौ केन रचितौ ?**

(क) कल्हणेन (ख) वाल्मीकिना (ग) भासेन (घ) तुलसीदासेन

**३ ) 'दूतवाक्यम्'इति नाटकस्य रचयिता कः वर्तते ?**

(क) जयदेवः (ख) भासः (ग) जायसी (घ) सोमदेवः

**४ ) भोजप्रबन्धस्य रचयिता कः वर्तते ?**

(क) भर्तृहरिः (ख) बाणभट्टः (ग) बल्लालः (घ) वरदराजाचार्यः

**५ ) दर्पदलनग्रन्थस्य रचयिता कः अस्ति ?**

(क) भारविः (ख) श्रीहर्षः (ग) कौटिल्यः (घ) क्षेमेन्द्रः

**६ ) काव्यमीमांसाग्रन्थस्य कर्ता कः वर्तते ?**

(क) राजशेखरः (ख) सोमदेवः (ग) अमरुकः (घ) भासः

**७ ) कर्णभारनाटकस्य रचयिता कः वर्तते ?**

(क) जगनिकः (ख) विष्णुशर्मा (ग) भासः (घ) सेनापतिः

उत्तराणि – (१) ख (२) ग (३) ख (४) ग (५) घ (६) क (९) ग

# अस्माकम् आगामिकार्यक्रमाः

## संस्कृत-साम्प्रतम्

(Sampratam means "Current")

धन्यवादः...

संस्कृतसाम्प्रतं पत्रिका चतुर्दशवर्षेभ्यः प्रतिमासं संस्कृताभिमानिनां सेवायां प्रकाश्यते । संस्कृताभिमानिनां भवतां सहयोगेन सरस्वतीमातुः कृपया च पत्रिकायाः यात्रा पञ्चदशे वर्षे आरभ्यते । एतस्मिन् प्रसङ्गे वयं ग्राहकानां सहयोगिनां च ऋणं स्वीकुर्मः धन्यवादाश्च व्याहरामः ।

सम्पादकः


संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

ग्राहक शुल्कम्

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY

॥ जयतु संस्कृतं जयतु भारतम् ॥

# Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

## बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date** : 13/06/20 to 10/04/21

**Day** : Saturday

**Time** : 5.30pm to 7.00pm

**Fees** : 5000/-

- **Venue** : Eklavya Sanskrit Academy Core House, , Nr Parimal Garden, Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay, Mobile: 98246 16237


**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।


EKLAVYA SANSKRIT ACADEMY

॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**

For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006